# Aparadha Stava

# શિવ અપરાધસ્તવઃ

## Document Information

Text title : Aparadha Stava 02 44

File name : aparAdhastavaH.itx

Category : shiva

Location : doc_shiva

Proofread by : Aruna Narayanan

Description/comments : From stotrArNavaH 02-44

Latest update : July 25, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 28, 2023

*sanskritdocuments.org*

# શિવ અપરાધસ્તવઃ

શમ્ભો શઙ્કર શાન્ત શાશ્વત શિવ સ્થાણો ભવોમાપતે
ભૂતેશ ત્રિપુરાન્તક ત્રિનયન શ્રીકણ્ઠ કાલાન્તક ।
શર્વોગ્રાભય ભર્ગ ભીમ જગતાં નાથાક્ષય શ્રીનિધે
રુદ્રેશાન મહેશ્વરેશ્વર મહાયોગીશતુભ્યં નમઃ ॥ ૧॥

સ્વામિન્ સર્વજગદ્ગુરો હર મહાલીલાક્ષમાક્ષેત્રસ-
ચ્ચિદ્રૂપાખિલભૂતભાવ્યજગતાં નાથ પ્રપન્નાર્તિહન્ ।
પાપઘ્નાશુભપાશદુઃખભયહૃદ્ભક્તેષ્ટદ જ્ઞાનદ
શ્રીદાતર્ક્ર્ય ષડઙ્ગ મોક્ષણ મહાયોગીશ તુભ્યં નમઃ ॥ ૨॥

ક્રૂરં કષ્ટતરં વિનષ્ટહૃદયં ભ્રષ્ટં શઠં નિષ્ઠુરં
નિર્લજ્જં કૃપણં કૃતઘ્નમશુચિં બહ્વાશિનં હિંસકમ્ ।
આશાપાશશતપ્રબદ્ધમનસં દુષ્કીર્તિભાજં જડં
કારુણ્યાકરવારિધે ભવ પિતર્દોષાકરં પાહિ મામ્ ॥ ૩॥

મૂર્ખં બાલમતિં સ્વધર્મરહિતં ધર્માર્થહીનં ખલં
કામાન્ધં ક્ષણિકં કદર્થનપરં દૌશ્શીલ્યજન્મસ્થલમ્ ।
અજ્ઞં લુબ્ધમસત્યનિષ્ઠમધમં પ્રજ્ઞાયશોવર્જિતં
કારુણ્યાકરવારિધે ભવ પિતર્દોષાકરં પાહિ મામ્ ॥ ૪॥

ક્ષુદ્રં દુર્ભગમલ્પસત્ત્વમલસં ભગ્નવ્રતં રાગિણં
ભીરું ડામ્ભિકમીર્ષ્યકં વ્યસનિનં પાપાત્મકં સૂતકમ્ ।
આધિવ્યાધિનિપીડિતં જડધિયં સદ્ભિઃ સદા નિન્દિતં
કારુણ્યાકરવારિધે ભવ પિતર્દોષાકરં પાહિ મામ્ ॥ ૫॥

આકાઙ્ક્ષાશ્રયમાર્યવર્તિવિમુખં ક્ષીણં ગુણદ્વેષિણં
ધૂર્તં દુર્ગુણમત્યશુદ્ધહૃદયં સર્વત્ર સન્દેહિનમ્ ।
દીનં પાપરતં સમસ્ત વિષયેષ્વાસક્તમન્યાયિનં
કારુણ્યાકરવારિધે ભવ પિતર્દોષાકરં પાહિ મામ્ ॥ ૬॥

અશ્રદ્ધં ગતપૌરુષં કુપથગં જાજ્વલ્યમાનં હૃષા
    સંસારાર્ણવમગ્નમૂર્મિતરલં નીચપ્રિયં નિર્દયમ્ ।
વૈરાગ્યાનતિદાનયોગનિયમદ્વેષ્ટારમુન્માદિનં
    કારુણ્યાકરવારિધે ભવ પિતર્દોષાકરં પાહિ મામ્ ॥ ૭॥

દ્વન્દ્વગ્રસ્તસમસ્તવૃત્તિકુશલં સત્સઙ્ગવિદ્વેષિણં
    દુઃસઙ્ગપ્રિયમપ્રતિષ્ઠવચનં કામાતુરં તસ્કરમ્ ।
શૈવજ્ઞાનપરાઙ્મુખં ખલજનવ્યાપારપારઙ્ગતં
    કારુણ્યાકરવારિધે ભવ પિતર્દોષાકરં પાહિ મામ્ ॥ ૮॥

દુર્મત્યાવમતિપ્રવૃદ્ધરજસં સદ્વૃદ્ધસેવારિપું
    સદ્ધર્મેષ્વસમુત્સુકં ગુરુજને માન્યેષુ ચાત્યુદ્ધતમ્ ।
શિષ્ટાશિષ્ટકરપ્રિયં ચ સતતં દુષ્ટસ્ય તુષ્ટિપ્રદં
    કારુણ્યાકરવારિધે ભવ પિતર્દોષાકરં પાહિ મામ્ ॥ ૯॥

સ્વપ્રેઽપ્યુત્તમગન્ધપુષ્પનિકરૈરીશાર્ચનાવર્જિતં
    ધ્યાનાધ્યાનવિચારણાગુણરિપું તુચ્છં મદોચ્છૃઙ્ખલમ્ ।
દારિદ્ર્યાસ્પદમાત્મવૈરિવિશગં તાપત્રયસ્યાશ્રયં
    કારુણ્યાકરવારિધે ભવ પિતર્દોષાકરં પાહિ મામ્ ॥ ૧૦॥

આત્માતિસ્તુતિકારિણં પરમહાનિન્દાકરં નિન્દિતં
    લુણ્ટાકં પતિતં વિપર્યયગતસ્વાન્તં સદા યાચકમ્ ।
વ્યાક્રોશાદ્વિહતસ્વકાર્યનિચયં સર્વાપદાં સઞ્ચયં
    કારુણ્યાકરવારિધે ભવ પિતર્દોષાકરં પાહિ મામ્ ॥ ૧૧॥

કૃત્યાકૃત્યવિચારવર્જિતમતિં વ્રાત્યં મહાવઞ્ચકં
    દુર્બુદ્ધિં મદમાનમત્સરનિધિં દુર્વૃત્તવૃત્ત્યાશ્રયમ્ ।
મિથ્યાજ્ઞાનિનમાર્યકણ્ટકમલં લોકત્રયે દૂષિતં
    કારુણ્યાકરવારિધે ભવ પિતર્દોષાકરં પાહિ મામ્ ॥ ૧૨॥

દુષ્કર્મપ્રચયે પ્રહૃષ્ટહૃદયં ક્લેશૈશ્ચ સમ્પીડિતં
    ચાર્વાકં કુમતિં કુચેલમલસં કાર્પણ્યજન્મસ્થલમ્ ।
ભાર્યાપુત્રગૃહાદિસક્તમનસં ગામ્ભીર્યધૈર્યચ્યુતં
    કારુણ્યાકરવારિધે ભવ પિતર્દોષાકરં પાહિ મામ્ ॥ ૧૩॥

ચિત્તક્ષોભકરં કલઙ્કહૃદયં શોકાસ્પદં લોલુપં

સારાસારવિચારહીનમનસં નીચપ્રિયં નીરસમ્ ।
મત્તોન્મત્તનિકૃષ્ટનષ્ટચકિતં શૂન્યં હૃદાલાપિનં
કારુણ્યાકરવારિધે ભવ પિતર્દોષાકરં પાહિ મામ્ ॥ ૧૪॥

આત્મજ્ઞાનવિહીનમાત્મવિમુખં સર્વાત્મભાવદ્વિષં
સઙ્કલ્પૈર્બહુભિર્વિભિન્નહૃદયં દૈત્યપ્રસક્તં સદા ।
મર્માવિદ્વચનં કઠોરહૃદયં મિત્રદ્રુહં ચુમ્બકં
કારુણ્યાકરવારિધે ભવ પિતર્દોષાકરં પાહિ મામ્ ॥ ૧૫॥

વેદોક્તાચરણાશિવાત્મચરિતં સ્વેચ્છાપ્રવૃત્તિં સદા
સચ્છાસ્ત્રેષ્વપરાગિણં પ્રિયતમાલક્ષ્મીગુણાવેષ્ટિતમ્ ।
દાક્ષિણ્યપ્રતિપન્નતાવિરહિતં સ્વાર્થૈકદૃષ્ટિં સદા
કારુણ્યાકરવારિધે ભવ પિતર્દોષાકરં પાહિ મામ્ ॥ ૧૬॥

સત્યત્યાગદયાક્ષમાશમદમાદ્યર્થાનભિજ્ઞાત્મકં
દેવબ્રાહ્મણગોવ્રજાતિથિપિતૃજ્ઞાનાત્મકાપૂજકમ્ ।
વિશ્વસ્તેષ્વપકારવઞ્ચનપરં મૈત્રીરિપું દુર્જનં
કારુણ્યાકરવારિધે ભવ પિતર્દોષકરં પાહિ મામ્ ॥ ૧૭॥

કૃત્વાધર્મમતિં કથઞ્ચિદપરઃ કો મત્સમોઽસ્મિન્ભવે-
દિત્યેવં બહુજલ્પિનં કુપુરુષં ભ્રાન્ત્યાશ્રયં રાક્ષસમ્ ।
દૃષ્ટાદૃષ્ટસુખૈષિણં બત મુદા મુક્ત્વા શિવારાધનં
કારુણ્યાકરવારિધે ભવ પિતર્દોષાકરં પાહિ મામ્ ॥ ૧૮॥

માર્જાલાખુબકાશ્વકુક્કુટકપિક્રોડાહિવૃત્તિં સદા
તીર્થધ્વાઙ્ક્ષમનર્થકં પરસુખે સન્તાપિનં દુઃસહમ્ ।
ત્યક્તોપાયમમેયકાઙ્ક્ષિણમહો શુણ્ઠં ચ ચોરોપમં
કારુણ્યાકરવારિધે ભવ પિતર્દોષાકરં પાહિ મામ્ ॥ ૧૯॥

અસ્પૃશ્યં વિકલં કુધૈર્યમખિલે દોષે સ્વકીયે ગુણં
પશ્યન્તં ચલમાત્મકાર્યનિરતં પૂજ્યં વિષાદાત્મકમ્ ।
ચિન્તાશોકપરીતચેતસમલં સર્વાશુભાનાં પદં
કારુણ્યાકરવારિધે ભવ પિતર્દોષાકરં પાહિ મામ્ ॥ ૨૦॥

દુષ્પૂરસ્વકકુક્ષિપૂરણપરં ભારં ભુવઃ કેવલં
દાસીમેષખરસ્વભાવમપટું સમ્માનને ભાજને ।
રિક્તં બાલકદીર્ઘસૂત્રિણમલં હૃચ્છલ્યશીલં સદા

કારુણ્યાકરવારિધે ભવ પિતર્દોષાકરં પાહિ ભામ્ ॥ ૨૧॥

અત્યાદેશિનમુત્તમસ્થિતિમતાં સન્ત્યાગિનં નાસ્તિકં
રન્ધ્રાન્વેષિણમન્ધમૂકબધિરં શમ્ભોસ્તુ વિશ્વાત્મનઃ ।
માહાત્મ્ય શ્રવણસ્તુતીક્ષણવિધૌ માહેશ્વરા વત્સલં
કારુણ્યાકરવારિધે ભવ પિતર્દોષાકરં પાહિ મામ્ ॥ ૨૨॥

દુષ્કાર્યાલઘુભારવાહનપશું તૃષ્ણાતૃણગ્રાહિણં
સંસારાર્ણવદુઃખપઙ્કપતિતં યાન્તં સદાધો ભૃશમ્ ।
સ્વત્વાહન્ત્વમમત્વમોહમકરૈરાકૃષ્યમાણં સદા
કારુણ્યાકરવારિધે ભવ પિતર્દોષાકરં પાહિ મામ્ ॥ ૨૩॥

ભ્રષ્ટં સર્વજુગુપ્સિતં પરહિતવ્યાઘાતિનં તામસં
સમ્ભ્રાન્તં ચપલં વિધાનવિહિતવ્યાપારવિદ્વેષિણમ્ ।
શમ્ભો ત્વત્પદભક્તિહીનમદૃઢં સમ્મૂઢમાત્મદ્વિષં
કારુણ્યાકરવારિધે ભવ પિતર્દોષાકરં પાહિ મામ્ ॥ ૨૪॥

જ્યેષ્ઠાવાસમતિપ્રમાદિતમતિં ક્ષુત્તૃડ્જરાદ્યર્દિતં
સ્વપ્નેઽપ્યન્યપરોપકારરહિતં સર્વાહિતં દુર્લભમ્ ।
લોકે સત્પરિહાર્યનિન્દિતમહો દુઃખપ્રદેશક્રિયં
કારુણ્યાકરવારિધે ભવ પિતર્દોષાકરં પાહિ મામ્ ॥ ૨૫॥

ત્વક્શુક્લાન્ત્રસિરાતનૂરુહમયં કારાખ્યરન્ધ્રસ્થિતં
નાનાપાયપતિષ્ણુ કાલશિખિના પાપચ્યમાનં ભૃશમ્ ।
દૃષ્ટ્વાપિ સ્વકલેવરં કૃશતરં તત્રાપિ રક્તં પશું
કારુણ્યાકરવારિધે ભવ પિતર્દોષાકરં પાહિ મામ્ ॥ ૨૬॥

કિં વાચા બહુવિસ્તરેણ ભગવન્ મત્સન્નિભો ભૂતલે
નાભૂન્નાસ્તિ ચ નો ભવિષ્યતિ પુમાન્ નિર્ભાગ્યચૂડામણિઃ ।
તસ્માદીદૃશમાત્મવઞ્ચકમહો ત્રૈલોક્યચૂડામણે
કારુણ્યાકરવારિધે ભવ પિતર્દોષાકરં પાહિ મામ્ ॥ ૨૭॥

સર્વશ્રેષ્ઠ ગુણૈકભાજન વિભો સત્ત્વોત્તમેષૂત્તમા-
સઙ્ખ્યેયાવગુણૈકભાજનમલં કષ્ટાતિકષ્ટક્રિયમ્ ।
શ્રીશાશ્રીશમતીન્દ્રિયેન્દ્રિયવશં નિસ્સઙ્ગિનં સઙ્ગિનં
કારુણ્યાકરવારિધે ભવ પિતર્દોષાકરં પાહિ મામ્ ॥ ૨૮॥

વિણ્મૂત્રકૃમિમાંસશોણિતમયં મેદોઽસ્થિમજ્જાત્મકં
  નિર્ગન્ધૈકનિધિં જરાપરિગતં વાતાદિદોષાત્મકમ્ ।
દૃષ્ટ્વા તુ સ્વશરીરમત્ર તુ સદા વૈરાગ્યહીનં પશું
  કારુણ્યાકરવારિધે ભવ પિતર્દોષાકરં પાહિ મામ્ ॥ ૨૯॥

વિષ્ઠામૂત્રકુજન્ત્વનિષ્ટમશુભં સ્વાભાવ્યતો નશ્વરં
  કૃષ્ણક્ષેણ્યવિષૂચિકાજ્વરશિરશ્શૂલાદિરોગાસ્પદમ્ ।
જ્ઞાત્વા તુ સ્વશરીરમત્ર તુ સદા વૈરાગ્યહીનં પશું
  કારુણ્યાકરવારિધે ભવ પિતર્દોષાકરં પાહિ મામ્ ॥ ૩૦॥

પઙ્ગુત્વાન્ધ્યજરિત્વમૌર્ખ્યખલતાબાધિર્યજન્મસ્થલં
  ક્લેદ્યચ્છેદ્યવિશોષ્યદાહ્યકૃશતાસ્થૌલ્યસ્વભાવાત્મકમ્ ।
સમ્પશ્યન્નપિ દોષમત્ર તુ સદા સમ્પ્રીતિયુક્તં પશું
  કારુણ્યાકરવારિધે ભવ પિતર્દોષાકરં પાહિ મામ્ ॥ ૩૧॥

દેહક્ષાલનલેપનાદિવિધિના સંસ્પર્શયોગ્યં ત્વચા
  છન્નં ક્લિન્નમહાર્ણવં વ્રણમુખૈર્નિત્યં સ્રવન્તં મલમ્ ।
તં દૃષ્ટ્વાપ્યવિરાગિણં ચ નરકે શૂનં સરાગં પશું
  કારુણ્યાકરવારિધે ભવ પિતર્દોષાકરં પાહિ મામ્ ॥ ૩૨॥

॥ ઇતિ અપરાધસ્તવઃ સમ્પૂર્ણઃ ॥

Proofread by Aruna Narayanan

*Aparadha Stava*

pdf was typeset on June 28, 2023

Please send corrections to *sanskrit@cheerful.com*